*E-Āntarikī*, Vol-I, Issue-1, March 2026 ISSN: 3139-7573 (Online)

# प्राचीनसंस्कृतसाहित्ये वर्णितानां स्त्रीणां कार्यकौशलम् – एकम् अध्ययनम्

**सुश्री लोपामुद्रा गोस्वामी**
सहायकाचार्या संस्कृतसर्वदर्शनविभागः
कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालयः
Email: loopamudragoswami03@gmail.com

**शोधसारः**

वैदिककाले स्त्रियः न केवलं गार्हस्थ्यजीवनस्य सुचारुव्यवस्थापनं चक्रुः , अपि तु शिक्षा-कला-राजनीति-कुटनीत्यादिषु क्षेत्रेषु अपि ताः स्वकीयं कौशलं प्रदर्शितवत्यः। वैदिककाले स्त्रियः ज्ञान- विज्ञानयोः क्षेत्रेऽपि अग्रगण्याः आसन्। तस्मात् ज्ञायते यत् ताः केवलं गार्हस्थ्यपरिधौ सीमिताः नासन्, अपि तु बौद्धिकविकासेऽपि महत्त्वपूर्णां भूमिकां निर्वहुः। आयुर्वेदे गृह्यसूत्रेषु च वर्णिताः स्त्रियः स्वास्थ्यरक्षणे, समाजव्यवस्थापने, व्यवहारेषु निपुणाः आसन्। महाकाव्येषु चित्रितानि स्त्रीपात्राणि विविधेषु रूपेषु वर्णितानि यानि तासां विशिष्टकार्यकौशलं प्रदर्शयन्ति। नाट्यशास्त्रे अपि नायिकाभेदाः तासां मनोवैज्ञानिककौशलं सूचयन्ति। कालिदासादीनां काव्येष्वपि वर्णिताः स्त्रियः नैकविद्याकलागुणैः समृद्धाः। अर्थशास्त्रादिषु नार्यः राजकार्येषु, गोपनीयसेवायां, व्यापारव्यवस्थायां च नियोजनीयाः इति निर्दिष्टम्। एतस्माद् ज्ञायते यत् प्राचीनभारतीयसमाजे तासां सक्रिया भूमिका आसीत्। प्राचीनस्त्रिणां योगदानम् अद्यतनसमाजस्य अपि प्रेरणास्रोतं भवितुम् अर्हति। तस्यैव संक्षिप्तालोचनम् अत्र विधीयते।

**कूटशब्दाः** – स्त्रियः**,** कार्यकौशलम्, व्यापारः, कला, चिकित्सा, राजनीतिः।

**प्रस्तावना**

समग्रे भारतवर्षेऽस्मिन् पुरुषवत् नार्य अपि मूर्धन्यस्थानं भजन्ते पुराकालादेव। नैकस्थलेषु नार्यः प्रधानं तु आसीदेव विशेषतः गृहस्थाश्रमे नारीणां प्राधान्यं दरीदृश्यते। तासां तादृशप्राधान्यमेव अवबोधनाय गृहिणीशब्दः प्रयुक्तः शास्त्रेषु यथा- यस्मिन् गृहिणी न भवति तत् गृहं गृहमेव नावभासते।[1] जन्मादारभ्य मृत्युपर्यन्तं नारीणाम् अनविच्छेद्यसम्बन्धत्वात् तस्याः प्रतिप्रादनं मनुना सम्यक्तया कृतम्। यथा-

द्विधा कृत्वाऽऽत्मनो देहमर्धेन पुरुषोऽभवत्।
अर्धेन नारी तस्यां च विराजमसृजत्प्रभुः।।[2]

[1] न गृहं गृहमित्याहुः गृहिणी गृहमुच्यते, महाभारतम्, शान्तिपर्व, 145

[2] मनुस्मृतिः, 1.32

समाजस्य समुन्नतिः नारीनरयोः समानप्रगत्या भवति। किन्तु भारतीयेतिहासे नारीणां सामाजिक-अर्थनैतिकादिषु दिक्षु उत्थानं पतनञ्च दृश्यते। भारतीयसंस्कृतेः परम्परायां न केवलं पुरुषाः, अपि तु महिला अपि समाजस्य शैक्षिक-धार्मिक-राजनैतिक-आर्थिकसांस्कृतिकविकासे महत्त्वपूर्णं योगदानम् अददुः। विशेषतः वैदिककाले नारीणां सम्मानम् आधिक्यम् आसीत्। केवलम् ऋग्वेदे एव विंशतिसंख्यकानां नारीकवीनां वर्णनं समुपलभ्यते। तत्र ऋषिकाणां प्रतिष्ठाविषये उपलभ्यते एवम्-

यथासिन्धुर्नदीनां साम्राज्यं सुषुवे वृषा ।
एवं त्वं सम्राज्ञ्येधि पत्युरस्तं परेत्य च ॥[3]

अस्मात् श्लोकात् वयं ज्ञातुं शक्नुमः यत् वैदिककाले नारीणां कियत् सम्मानम् आसीत्। परवर्तीकाले महाभारते तथा धर्मशास्त्रेषु स्त्रीणां शिक्षाप्रसंगः प्रसिद्धः तथा च तासां स्त्रीणां स्वधनाधिकारः, सम्पत्तिनियन्त्रणम्, व्यापारादयः सुनिर्दिष्टाः। तदनन्तरम् अर्थशास्त्रे चाणक्येन गणिकानां व्यवस्थितव्यवसायः वर्णितः। एते सर्वे दृष्टान्ताः सूचयन्ति यत् प्राचीनकाले अपि महिला उद्यमशीलाः आसन्। सर्वाः नार्यः भिन्नक्रियाषु दक्षा आसन् तथा तासु काश्चन निःशुल्कसेवां कृतवत्यः पुनः परवर्तीकाले काश्चन कार्येण धनमपि अर्जितवत्यः।

**शोधप्रविधिः**

शोधकार्यमिदं मौलिकशोधप्रविधिना प्रवर्तिष्यते । अत्र प्राचीनसंस्कृतसाहित्ये वर्णितानां स्त्रीणां कार्यकौशलम् इति विषयस्य अध्ययनसमये व्याख्यात्मकपद्धतिमाधारीकृत्य प्रवर्तते । उपलब्धप्राथमिकद्वितीयस्रोतसामाधारेण कार्यमिदं सम्पादयिष्यते । अत्र अध्ययनसमये वैदिकयुगस्य नारीणां तथा रामायण-महाभारत-काव्यपरम्परा-अर्थशास्त्रादिषु प्रतिपादितानां नारीणां कार्यदक्षता तथा आर्थिकभूमिकाविषये लिख्यते।

**शोधप्रश्नाः**

1. प्राचीनस्त्रीणां कानि विशिष्टानि कौशलानि आसन् ?
2. वेदेषु स्त्रीणाम् कार्यप्रवीणता कीदृशी आसीत्?
3. आधुनिककाले महिलानां सशक्तिकरणाय तासां प्राचीनानां स्त्रीणां कार्यकौशलेभ्यः किं ज्ञानं लब्धुं शक्नुमः?

**संस्कृतसाहित्ये उपलब्धानां स्त्रीणां कार्यदक्षताः**

स्त्रियः सर्वाणि कर्माणि कर्तुं समर्थाः सन्ति। प्राचीनकालादारभ्य एव ताः केवलं गार्हस्थधर्मं न निर्वहन्ति, अपि तु शिक्षाक्षेत्रे, राजकार्येषु, कूटनीतौ, युद्धविज्ञाने, चिकित्सायां,

---

[3] अथर्ववेदः.14.1.43

चतु:षष्टिकलासु अपि निपुणाः सन्ति। स्वकार्यदक्षतया ताः समाजसेवां निरन्तरं कुर्वन्त्येव। तस्माद् ज्ञायते यत् स्त्रियः केवलं गृहकार्येषु निबद्धाः न सन्ति, अपि तु सर्वेषु क्षेत्रेषु प्रतिभाशालिन्यः प्राचीनकालादेव वर्तन्ते। प्राचीनकाले स्त्रीणां शैक्षिक-आध्यात्मिकक्षेत्रे कीदृशी दक्षता आसीत् आदौ तत् पश्यामः। यथा- ऋग्वेदे स्त्रीणां विविधायामेषु यथा अबाधगति आसीत् तत्तु प्रशंसनीया। विशेषत अस्मिन् समये महिलाः शैक्षिककक्षेत्रेषु अग्रगण्य आसन्। तासु विदुषीसु विश्ववारा-सिकता-निवावरी-गार्गी-घोषा-लोपामुद्रा-अपाला- रोमशा इत्यादयः प्रमुखाः। तासां स्त्रीणाम् आत्मविश्वासोऽपि प्रबल आसीत्। यथा प्राप्यते- मा मे दभ्राणि मन्यथा अहमस्मि रोमशा इति।[4] एतासु काश्चन ऋषिकाः कवयः, याः स्वकाव्येन ज्ञानेन च कीर्तिं सम्पादितवत्यः । विशेषतः गार्गी-याज्ञवल्क्यसंवादः, मैत्रेयी-याज्ञवल्क्यसंवाद इत्यादयः एतासां विदुषाणां पाण्डित्यं दर्शयन्ति। तथैव आत्रेयी वाल्मीके अगस्त्यात् वेदान्तशिक्षाम् अलभत्। काशकृत्स्नी मीमांसायाः पुस्तकम् अरचयत्। 422 वेदमन्त्राणां मन्त्रद्रष्ट्र्यः ऋषिकाः सन्ति इति कपिलदेवद्विवेदीमहोदयः स्वग्रन्थे वेदो मे नारी इत्यत्र उद्धृतवान्। स्मृतिकाले यद्यपि स्त्रीशिक्षाया परिभवः जातः तथापि राजपरिवारस्य सुसम्पन्नपरिवारस्य महिलाः शिक्षाम् अलभन्त, याः प्रसिद्धकवयत्र्य अपि अभूवन्। यथा गाथा सप्तशती इति ग्रन्थे सप्त नारीकविनां नामानि प्राप्यन्ते। ताः यथा- रेवा, शेष, माधवी, अनुलक्ष्मी, पाहायी, वृद्धवाही तथा शशिप्रभा। राजशेखर अपि सूक्तिमुक्तावली इति ग्रन्थे कवयित्रीणां प्रशंसामकरोत्। विशेषतः विजया आख्यायाः नारीकवयत्रेः रचना राजशेखरः कालिदासेन सह कृतवान्। राजशेखरस्य पत्नी अपि कवयित्री आसीत्। अलतेकरमहोदयानुसारं विद्या विज्जका कौमुदीमहोत्सवं नाम्ना राजनीतिमूलकग्रन्थम् अरचयत्। संस्कृतलोकगाथासु शीला- इन्दुलेखा-मारूता-भवदेवी-विकटनितम्बा-सुभद्रादीनां कवयित्रीणां उल्लेखो प्राप्यते। वाद-विवादेष्वपि स्त्रियः प्रवीणाः आसन्। यथा- गार्गी- याज्ञवल्क्येन सह शास्त्रार्थं कृतवती। तथा च शंकर-मण्डनमिश्रयोः शास्त्रार्थस्य निर्णायिका अभयभारती आसीत्। रामायणे कौशल्या तारा च उभे मन्त्रविद्रुपेण परिचीयेते। महाभारतस्यापि द्रोपदी पण्डिता स्त्रीरूपेण प्रसिद्धा। ऋग्वेदानुसारं त्रिंशदधिकाः स्त्रियः ब्रह्मवादिन्य आसन्। तासु काश्चन – लोपामुद्रा, विश्वावारा, घोषा, सिकता, अपाला, नीवावरी, सूर्या, इन्द्राणी, ऊर्वशी, सरमा, यमी, श्रद्धा, वैवस्वथी, जूहु, कद्रूः, पौलोमी, शची, वागम्भ्रृणी, सरस्वती, शाश्वती, श्रीलक्षा ऊर्वशी देवाहूतिः मदालसा इत्यादयः। पुनः ऊर्वशी देवाहूतिः उभे योगशास्त्रज्ञे अपि आस्ताम्। यथा प्राप्यते ऊर्वशीविषये- सर्वाश्च ब्रह्मवादिन्यो महायोगाश्च ताः

[4] ऋग्वेदः, 1.126.7

स्मृताः।[5] सुलभा नाम्नी एका इतोऽपि योगिनी उल्लेखिता महाभारतस्य मोक्षधर्मपर्वणि। तदुपरि स्त्रीणां तपश्चरणादिकं तु वेद-रामायण-महाभारतादिषु प्रसिद्धमेव। तथैव महाराज्ञः अश्वपतेः पत्नी शाकल्यदेवी वने कन्यानां कृते प्रथमवारं गुरुकुलं स्थापितवती।

पुराकाले पुरुषेण सह यज्ञकर्मणि यथा स्त्रियः भागग्रहणं चक्रुः। मैकडोनालमहोदयानां मते विश्ववारा न केवलम् एका ऋषिका आसीत् अपि तु सा ऋत्विकत्वेन बहूनां यज्ञानाम् आधानम् अकरोत्। तथैव ऋषिका गोधा अपि यज्ञकर्मसम्पादने संलग्ना आसीत्। यथा प्राप्यते-

नकिर्देवा मिनीमसि नकिरा योपयामसि मन्त्रश्रुत्यं चरामसि।
पक्षेभिरपिकक्षेभिरत्राभि सं रभामहे।।[6]

रामायणेऽपि स्त्रीभिः कृतानां यज्ञानुस्थानानाम् उल्लेखो प्राप्यते। यथा- रामचन्द्रस्य यौवराज्याभिषेकसमये कौशल्या यज्ञानुष्ठानं कृतवती तथा च युद्धाय बलीनः प्रस्थानसमये तस्याः पत्नी तारा यज्ञानुस्थानं कृतवती। उभयोः कृते तत्र मन्त्रवित् शब्दस्य प्रयोगः दृश्यते। यथा ताराप्रसंगम् उद्धरामि-

ततः स्वस्त्ययनं कृत्वा मन्त्रविद्विजयैषिणी ।।[7]

तथैव रामायणे अशोकवाटिकायां सीता सन्ध्यावन्दनां कृतवती इत्यपि प्रसंगः आयाति। यथा-

सन्धाकालमनाः श्यामाः ध्रुवमप्पेति जानकी।
नन्दीं चेमां शुभजलां संन्ध्यार्थं वरवर्णिनी।।[8]

अलतेकरमहाभागः चतुर्विधयज्ञानुष्ठानस्योल्लेखं करोति यस्य सम्पादनं केवलं नार्यः कुर्वन्ति। एवं प्राचीनभारते नार्यः स्वाधिकारं यज्ञकर्मणि सुसम्पादयन्ति स्म।

कलासु नारीणां प्रावीण्यं विशेषतया प्रसिद्धम्। प्राचीनकाले सर्वाः स्त्रियः चतुःषष्टिकलासु निपुणाः आसन्। वात्सायनोऽपि कलायाः ज्ञानं नारीणां कृते आवश्यकम् इति उदितवान्। तस्मिन् समये नार्यः चित्रकला-गृहसज्जा-मालाग्रन्थन-क्रीडनकनिर्माण-संगीत-नृत्य-वादनादिषु प्रवीणाः आसन् इति प्रायः सर्वसाहित्यशास्त्रेषु प्राप्यते। यथा- हर्षचरिते राज्यश्री नृत्य-संगीतेषु पटूवी आसीत्। स्वप्नवासवदत्तम् इति ग्रन्थे वासवादत्ता वीणावादने दक्षा आसीत्। रत्नावलीनाटकस्य सागरिका चित्राङ्कने निपुणा आसीत्। मालविकायाः नाट्यपरीक्षा अपि विदर्भराजमाधवदेवस्य

---

[5] वायुपुराणम्, 69.51-52
[6] ऋग्वेदः, 10.134.7
[7] महाभारतम्, 4.16.12
[8] वाल्मिकीयरामायणम्, 5.14.49

मन्त्रीणः भगिनी अकरोत्। वात्सायनः चतुःषष्टिकलानां शिक्षणं नार्यः एव दद्युः इत्यपि उक्तवान् ।[9] प्राचीनकाले राजानः स्वपुत्र्याः कलाज्ञानाय तां नगरवधूनां पार्श्वे प्रेषयन्ति स्म। यतोहि ताः सर्वकलासु निपुणाः आसन्।

युद्धक्षेत्रेऽपि स्त्रीणां सौर्यत्वं प्राचीनकालादेव दृश्यते। समरभूमौ गोष्ठ्यादीष्वपि नार्यः भागं जगृहुः। उच्यते यथा- संहोत्रं स्म पुरा नारी समनं वाव गच्छति।[10] पुनश्च प्राप्यते- मुद्गलानी दनुजैः सह संग्रामे विजयीभूत्वा सहस्रधेनूः मुमोच। यथा-

रथीरभूद् मुगलानी गविष्टौ अजयत् सहस्रम्।[11]

उत इन्द्रपत्नी स्वयं सेनापतित्वेन युयुधे। पुनः स्त्रीयः शासनव्यवस्थां न्यायव्यवस्थाञ्च दृष्टवन्तः यथा-

प्रजापतिष्ट्वा सादयत्वपां पृष्टे समुद्रस्येमन्।
व्यचस्वतीं प्रथस्वतीं प्रथस्व पृथिव्यसि।।[12]

पुनः ऋग्वेदस्य दशममण्डले विश्वपा इतस्याः उल्लेखो प्राप्यते यस्याः युद्धे पादभंगः जातः, अनन्तरम् अश्विनीकुमारौ तस्यै लोहनिर्मितजंघां प्रत्यर्पितवन्तौ। प्राप्यते यथा-

युवं वन्दनमृश्यदादुदूपथुर्युवं सद्यो विश्पलामेतवे कृथः।[13]

तथैव अपरा एका नारी मुद्लानी नाम्ना या संग्रामक्षेत्रे स्वस्य पतेः मुद्गलस्य सारथिं भूत्वा शत्रुहस्तात् सहस्रगाः उद्धारितवती। एवमुक्तम्-

उत्स्म वातो वहति वासो अस्या अधिरथं यदजयत्सहस्रम्।
रथीरभून्मुद्गलानी गविष्टौ भरे कृतं व्यचेदिन्द्रसेना।।[14]

रामायणस्य अयोध्याकाण्डेऽपि कैकेयी राज्ञः दशरथस्य सारथिं भूत्वा तस्य रक्षां कृतवती-

अपवाह्य त्वया देवि संग्रामान्नष्टचेतनः।
तत्रापि विक्षतः शस्त्रैः पतिस्ते रक्षितस्त्वया।।[15]

कौटिल्यः स्त्रीं गुप्तकार्येषु नियोजितवान्। यथा प्राप्यते- परिव्राजिका वृत्तिकामा दरिद्रा विधवाप्रगल्भा ब्राह्मण्यन्तःपुरे कृतसत्कारा महामात्रकुलान्यधिगच्छेत्। तथैव आभ्यन्तरचरेषु अपि

---

[9] कामसूत्रम्, 1.3.14
[10] अथर्ववेदः, 20.126.10
[11] ऋग्वेदः, 10.102.2
[12] यजुर्वेदः, 13,17
[13] ऋग्वेदसंहिता, 10.39.8
[14] तत्रैव, 10.102.2
[15] वाल्मिकीयरामायणम्, 2.9.16

सः स्त्रीं नियोजयेत्[16] इति अर्थशास्त्रे प्रतिपादितवान्। पुनश्च स्त्रियः विभिन्नसमये उदात्तोपदेशमपि दत्तवत्यः इत्यपि प्राप्यते।

प्राचीनकाले स्त्रियः चिकित्साशास्त्रे अपि दक्षा आसीत्। अरवीभाषायाम् अष्टमशताब्द्याम् अनुदितम् एकं पुस्तकं प्राप्यते। यस्य रचयित्री रूसा आसीत् । इदं पुस्तकं धातृकर्मविषयकम् अस्ति। तथैव अपाला आत्रेयी आसीत्, या चर्मरोगविशेषज्ञा आसीत्। पुनः घोषा काक्षीवती कुष्ठरोगविशेषज्ञा आसीत्।

**निष्कर्षः**

प्राचीनसंस्कृतसाहित्ये यद्यपि महिलाः सामान्यतया गृहिण्यः वा साध्व्यः इति रूपेण वर्णिताः, तथापि कतिपय सन्दर्भाः तासां उद्यमिताम्, स्वधनव्यवस्थाम्, व्यापारकौशलम्, कला-वाणिज्ये तासां निपुणताञ्च सूचयन्ति। वेदोपनिषदः तासां बौद्धिकस्वातन्त्र्यम्, अर्थशास्त्रं तासाम् आर्थिककौशलम्, महाभारतधर्मशास्त्रादयः तासाम् अधिकारान् दर्शयन्ति। अतः प्राचीनभारते महिलाः समाजे सर्वैः कौशलैः प्रतिष्ठिता आसन्। प्राचीनाः महिलाः यथा श्रृंगार-प्रसाधनानां वस्तूनि, वस्त्राणि, माला, क्रीडनकनिर्माणादि स्वयमेव निर्मितवत्यः तथैव तासां कलानां विशेषतः चतुषष्ठिःकलानाम् अभ्यासेन आधुनिककालेऽपि महिलाः अर्थोपार्जनं कर्तुं शक्नुवन्ति। तथैव शिक्षाशास्त्रेषु चिकित्साशास्त्रेषु राजनैतिकक्षेत्रेषु प्रतिरक्षादिपदेषु स्वस्य नैपुण्यं प्रदर्शयेत् तथा भारतस्य गौरवम् अभिवर्धयेत्।

**सन्दर्भग्रन्थाः**

*अथवर्वेदः*, सं डा. गंगासहायशर्मा, संस्कृत साहित्य प्रकाशन, नई दिल्ली, 2015

*मनुस्मृतिः*, सं पण्डित तुलसीराम स्वामिना, अध्यक्ष स्वामी प्रेस मेरठ शहर,

*ऋग्वेदः*, वेदमूर्ति तपोनिष्ठ, संस्कृति संस्थान बरेली

*वायुपुराणम्*, सं वेदमूर्ति तपोनिष्ठ, संस्कृति संस्थान बरेली, 1967

महाभारतम्, अनु. पण्डित रामनारायणदत्त, गीताप्रेस गोरखपुर

*वाल्मिकीयरामायणम्*, गीताप्रेस गोरखपुर

*वात्सायनकामसूत्रम्*, सं डॉ पारसनाथ द्विवेदी, चौखम्बा सुरभारती प्रकाशन वाराणसी

*यजुर्वेदः*, अनु. डा. रेखा व्यास, संस्कृत साहित्य प्रकाशन, नई दिल्ली, 2015

*कौटिलीयार्थशास्त्रम्*, सं डा श्यामलेश कुमार तिवारी, चौखम्बा सुरभारती प्रकाशन वाराणसी, 2017

[16] कौटिलीयार्थशास्त्रम्, 1.12.04